Homas
the spiritual way to success
K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अत्र प्रसङ्गात् विश्वावसुमन्त्रोपि लिख्यते—

भार्गवः महावैश्रवणो वा ऋषिः। विराट् छन्दः। इन्द्राणी वा गन्धर्वराजविश्वावसुर्वा देवता। ह्रीं बीजम्। क्लृं शक्तिः। अभिलषितकन्या-(प्राप्त्य)र्थे विनियोगः। गन्धर्वराजन् (राज) हृत्। विश्वावसो शिरः। ममाभिलषितां शिखा। कन्यां कवचम्। प्रयच्छ स्वाहा अस्त्रम्॥

ध्यानम्—

ध्यायन्निक्षुरसान्विते रथवरे पुण्ड्रेक्षुभिः कल्पिते
कल्हारस्रगुपात्तपाणिकमलैः कन्याजनैस्सेवितम्।
गन्धर्वाधिपतिं प्रसन्नवदनं विश्वावसुं यः पुमान्
मन्त्रं तस्य जपेल्लभेत नियतं कन्यामसौ कांक्षिताम्॥

गन्धर्वराजन् (राज) विश्वावसो ममाभिलषितां कन्यां प्रयच्छ स्वाहा॥ इति मन्त्रः॥

रम्यां विश्वावसो कन्यामलङ्कारादिसंयुताम्।
ममाभिलषितां कन्यां देहि वीणामिवापराम्॥

इति च मन्त्रः॥ अनयोर्मन्त्रयोरनुयतं सर्वं पूर्वोक्ततो ग्राह्यम्॥